बीजं निक्षिप्तं ग्रीवायां विधानमनुवर्त्तत ।
ग्रीवायां पतितं बीजं सुग्रीवः समपद्यत ॥”
इति रामायणे उत्तरकाण्डे । ३७ सर्गः ॥
अपि च ।
“वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥”
इति रामायणे बालकाण्डे १७ सर्गः ॥
“ततः शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त इव पादपः ॥”
इति किष्किन्ध्याकाण्डे १७ सर्गः ॥
(वालाः केशाः सन्त्यस्य ।) वालविशिष्टे, त्रि ॥

वालीशः, पुं, मूत्रकृच्छ्ररोगः । इति शब्दरत्नावली ॥

वा(बा)लुः, स्त्री, (वलते अनेन । वल प्राणने । वल + उण् ।) एलवालुकनामकगन्धद्रव्यम् । इत्युणादिकोषः ॥

वा(बा)लुकं, क्ली, ( वालुरेव । स्वार्थे कन् । ) एलवालुकम् । इत्यमरः । २ । ४ । १२१ ॥

वा(बा)लुकः, पुं, पानीयालुः । इति राजनिर्घण्टः ॥

वा(बा)लुका, स्त्री, (वालुक + टाप् ।) रेणुविशेषः । बालि इति भाषा । तत्पर्य्यायः । सिकता २ सिता ३ शीतला ४ सूक्ष्मशर्करा ५ प्रवाही ६ महासूक्ष्मा ७ सूक्ष्मा ८ पानीयचूर्णिका ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सन्तापश्रमनाशित्वञ्च ।
“सेकप्रयोगतश्चैव शाखाशेषानिलापहा ॥”
इति राजनिर्घण्टः ॥
शाखा हस्तपादादि ॥ कर्कटी । इति जटाधरः ॥ कर्पूरः । यन्त्रविशेषः । इति शब्दचन्द्रिका ॥

वा(बा)लुकागड़ः, पुं, ( वालुकायाः गड़तीति तस्मात् चरति यः । वालुका + गड़चरणे + पचाद्यच् । वालुकाजातत्वादस्य तथात्वम् । ) मत्स्यविशेषः । वालिया इति भाषा । तत्पर्य्यायः ॥ सिताङ्गः २ । इति हारावली । १६० ॥

वा(बा)लुकात्मिका, स्त्री, ( वालुकावदात्मा स्वरूपो यस्याः । कन् अत इत्वम् । ) शर्करा । इति शब्दचन्द्रिका ॥ ( वालुका आत्मा यस्य । ) वालुकामये, त्रि ॥

वा(बा)लुकाप्रभा, स्त्री, ( वालुकानामणूनां रेणूनां प्रभा यस्याम् । अणुवालुकापरिणामत्वादस्य तथात्वम् । ) नरकविशेषः । इति हेमचन्द्रः । ५ । ३ ॥

वा(बा)लुकामयं, त्रि, (वालुका + मयट् ।) सिकतामयम् । इति सैकतशब्दटीकायां भरतः ॥

वा(बा)लुकायन्त्रं, क्ली, ( वालुकाया यन्त्रम् । ) औषधपाकार्थयन्त्रविशेषः । यथा,—
“भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपके ।
कूपिकाकण्ठपर्य्यन्तं वालुकाभिश्च पूरिते ॥
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
वालुकायन्त्रमेतद्धि यन्त्रतन्त्रबुधैः स्मृतम् ॥”
इति भावप्रकाशः ॥

वा(बा)लुकास्वेदः, पुं, ( वालुकाभिर्विहितः स्वेदः । ) तप्तवालुकाभिस्तापनम् । यथा,—
“वातश्लेष्मकृते स्वेदान् कारयेदुष्णनिर्म्मितान् ।
स्निग्धः स्वेदो निषिद्धोऽत्र विना केवलवातजान् ॥
खर्परभ्रष्टपटस्थितकाञ्जिकसंसिक्तवालुका स्वेदः ।
शमयति वातकफामयमस्तकशूलाङ्गभङ्गादीन् ॥
स्रोतसां मार्द्दवं कृत्वा नीत्वा पावकमाशयम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥”
इति भावप्रकाशः ॥

वा(बा)लुकी, स्त्री, ( वलति वालयति वा । वल-प्राणने + उक । स्त्रियां ङीप् । ) कर्कटीभेदः । तत्पर्य्यायः । बहुफला २ स्निग्धफला ३ चैत्रकर्कटी ४ चैत्ररुहा ५ काङ्क्षिका ६ मूत्रला ७ । अस्या गुणाः ।
“वालुकी वातशमनी शीता हृद्या श्रमापहा ।
पित्तास्रशमनी रुच्या कुरुते कासपीनसौ ॥
“स्याद्वालुकी शरदि वर्षजदोषकर्त्री
हैमन्तजा च खलु पित्तहरा च रुच्या ।
चिप्रं करोति खलु पीनसमर्द्दपक्वा
पक्वा त्वतीवमधुरा फलकारिणी च ॥”
इति राजनिर्घण्टः ॥

वा(बा)लुङ्की, स्त्री, कर्कटी । इति त्रिकाण्डशेषः ॥

वा(बा)लुङ्गिका, स्त्री, कर्कटी । इति शब्दरत्नावली ॥

वा(बा)लुङ्गी, स्त्री, कर्कटी । इति शब्दरत्नावली ॥

वा(बा)लूकः, पुं, ( वलते प्राणान् हन्ति यः । वल ड वधे + ऊक । ) विषभेदः । इति हेमचन्द्रः । ४ । २ । ३ ॥

वा(बा)लेयः, पुं, ( वलये उपकरणाय साधुः । बलि + “छदिरुपधिवलेर्ढञ् ।” ५ । १ । १३ । इति ढञ् । ) रासभः । इत्यमरः । २ । ९ । ७७ ॥ ( यथा, मार्कण्डेये । ५० । ८५ ।
“एकच्छागं द्विबालेयं त्रिगवं पञ्चमाहिषम् ।
षडश्वं सप्तमातङ्गं गृहं यत्नात् शोषय ॥”
बलेः स्वनामख्यातस्य दैत्यस्यापत्यं पुमान् । बलि + ढक् ।) दैत्यविशेषः । इति धरणिः ॥ (बलिः विरोचनपुत्रस्तस्य बाणज्येष्ठं पुत्रशतं जातम् ते च बालेयनाम्ना विख्याताः । यदुक्तमग्निपुराणे ।
“विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान् ।
बलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहाबलाः ।
सहस्रबाहुर्ज्येष्ठश्च कन्य दे च बलेः शुभे ॥
बलेः पुत्रास्तु पौत्राश्च शतशोऽथ सहस्रशः ।
बालेयो नाम विख्यातो गणो विक्रान्तपौरुषः ॥”
जनमेजयवंशोद्भवस्य सुतपसो राज्ञः पुत्रो बलिस्तस्य पञ्च पुत्राश्च बालेयाः । यथा, हरिवंशे । ३१ । ३०—३३ ।
“फेनस्य सुतपा जज्ञे जज्ञे सुतपसो बलिः ।
जातो मानुषयोनौ तु स राजा काञ्चनेषुधिः ॥
महायोगी स तु बलिर्बभूव नृपतिः पुरा ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि ॥
अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ।
पुण्ड्रः कलिङ्गश्च तथा बालेयं क्षत्रमुच्यते ॥
बालेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि ।
बलेस्तु ब्रह्मणा दत्ता वराः प्रीतेन भारत ! ॥”)
अङ्गारवल्लरी । इति विश्वः ॥ चाणक्यमूलकम् । इति राजनिर्घण्टः ॥

बालेयः, त्रि, ( बालाय हितः । बाल + ढञ् । ) मृदुः । बालहितः । इति मेदिनी ॥ (बलये उपहाराय हितः । बलि + छदिरुपधिबलेर्ढञ् ।” ५ । १ । १३ । इति ढञ् । तण्डुलः ॥ यथा, सिद्धान्तकौमुद्याम् । “बालेयास्तण्डुलाः ॥” बलियोग्यः । यथा, रघौ । १४ । ७७ ।
“पुष्पं फलञ्चार्त्तवमाहरन्त्यो
बीजञ्च बालेयमकृष्टरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गा-
मुदारवाचो मुनिकन्यकास्त्वाम् ॥”
वितुन्नकनाम्नो वृक्षस्य त्वचि क्ली । तत्पर्य्यायो यथा,—
“कुटन्नटं दाशपुरं बालेयं परिपेलवम् ।
प्लवगोपुरगोनर्द्दकैवर्त्तीमुस्तकानि च ॥
मुस्तावत् पेलवपुटं शुक्राभं स्यादितुन्नकम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बालेयशाकः, पुं, ( बालेयः बलिहितः शाकः । ) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ६० ॥

बालेष्टः, पुं, (बालानां इष्टः प्रियः ।) बदरः । इति राजनिर्घण्टः ॥ बालकाभिलषिते, त्रि ॥

बालोपवीतं, क्ली, ( बालानां बालकानां उपवीतम् । ) बालकपरिधानवस्त्रम् । तत्पर्य्यायः । पञ्चावटम् २ उरस्कटम् ३ । इति हारावली । ४८ ॥ द्विजबालकानां यज्ञसूत्रञ्च ॥

बाल्मीकिः, पुं, वल्मीकस्यापत्यम् । ( वल्मीक + इञ् । ) वल्मीकप्रभवो यस्मात् तस्माद्वाल्मीकिरित्यसौ इति ब्रह्मवैवर्त्तोक्तिः । वल्मीकप्रभवत्वेन गौणी पुत्रादिवच्छौणमस्य वल्मीकापत्यत्वं गृहीत्वैव साधुरपत्यार्थः । यद्वा वल्मीक इति ऋषिविशेषस्य संज्ञेत्याहुः ॥ मुनिविशेषः । यथा,—
“तपःस्वाध्यायनिरतं तपस्वी वाग्विदाम्वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥”
इति रामायणप्रथमश्लोकः ॥
अपि च । ततस्तदनुग्रहलब्धं रामचरितं सरहस्यं निरवशेषं तत्प्रसादादेव सम्यक् विज्ञाय भूलोकवर्त्तिनां चतुर्णां वर्णानां तापत्रयविमोचनाय ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः स्वकृतशतकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामध्यापयत् । इति तट्टीका ॥ अपि च ।
“नारायणात्मकाः सर्व्वे तेषां रामोऽग्रणोऽभवत् ।
रावणान्तकरो राजा रघूणां वंशवर्द्धनः ॥
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः ॥”)
इति मात्स्ये १२ अध्यायः ॥